# ॥ ललिता स्तवराजः ब्रह्माण्डमहापुराणे ॥

.. lalitA stavarAjaH from brahmANDamahApurANa ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : lalitAstavarAjaH brahmANDapurANe
File name : lalitAstavarAjabrahmANDa.itx
Category : stavarAja
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : PSA Easwaran psaeaswaran at gmail.com
Proofread by : PSA Easwaran psaeaswaran at gmail.com
Latest update : December 14, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ ललिता स्तवराजः ब्रह्माण्डमहापुराणे ॥

देवा ऊचुः
जय देवि जगन्मातर्जय देवि परात्परे ।
जय कल्याणनिलये जय कामकलात्मिके ॥ ३.१३.१॥

जयकारि च वामाक्षि जय कामाक्षि सुन्दरि ।
जयाखिलसुराराध्ये जय कामेशि मानदे ॥ ३.१३.२॥

जय ब्रह्ममये देवि ब्रह्मात्मकरसात्मिके ।
जय नारायणि परे नन्दिताशेषविष्टपे ॥ ३.१३.३॥

जय श्रीकण्ठदयिते जय श्रीललितेऽम्बिके ।
जय श्रीविजये देवि विजयश्रीसमृद्धिदे ॥ ३.१३.४॥

जातस्य जायमानस्य इष्टापूर्तस्य हेतवे ।
नमस्तस्यै त्रिजगतां पालयित्र्यै परात्परे ॥ ३.१३.५॥

कलामुहूर्तकाष्ठाहर्मासर्तुशरदात्मने ।
नमः सहस्रशीर्षायै सहस्रमुखलोचने ॥ ३.१३.६॥

नमः सहस्रहस्ताब्जपादपङ्कजशोभिते ।
अणोरणुतरे देवि महतोऽपि महीयसि ॥ ३.१३.७॥

परात्परतरे मातस्तेजस्तेजीयसामपि ।
अतलं तु भवेत्पादौ वितलं जानुनी तव ॥ ३.१३.८॥

रसातलं कटीदेशः कुक्षिस्ते धरणी भवेत् ।
हृदयं तु भुवर्लोकः स्वस्ते मुखमुदाहृतम् ॥ ३.१३.९॥

दृशश्चन्द्रार्कदहना दिशस्ते बाहवोऽम्बिके ।
मरुतस्तु तवोच्छ्वासा वाचस्ते श्रुतयोऽखिलाः ॥ ३.१३.१०॥

क्रीडा ते लोकरचना सखा ते चिन्मयः शिवः ।
आहारस्ते सदानन्दो वासस्ते हृदये सताम् ॥ ३.१३.११॥

दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते ।
शिरोरुहा घनास्ते तु तारकाः कुसुमानि ते ॥ ३.१३.१२॥

धर्माद्या बाहवस्ते स्युरधर्माद्यायुधानि ते ।
यमाश्च नियमाश्चैव करपादरुहास्तथा ॥ ३.१३.१३॥

स्तनौ स्वाहास्वधाऽऽकरौ लोकोज्जीवनकारकौ ।
प्राणायामस्तु ते नासा रसना ते सरस्वती ॥ ३.१३.१४॥

प्रत्याहारस्त्विन्द्रियाणि ध्यानं ते धीस्तु सत्तमा ।
मनस्ते धारणाशक्तिर्हृदयं ते समाधिकः ॥ ३.१३.१५॥

महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव ।
भूतं भव्यं भविष्यच्च नित्यं च तव विग्रहः ॥ ३.१३.१६॥

यज्ञरूपा जगद्धात्री विश्वरूपा च पावनी ।
आदौ या तु दयाभूता ससर्ज निखिलाः प्रजाः ॥ ३.१३.१७॥

हृदयस्थापि लोकानामदृश्या मोहनात्मिका ॥ ३.१३.१८॥

नामरूपविभागं च या करोति स्वलीलया ।
तान्यधिष्ठाय तिष्ठन्ती तेष्वसक्तार्थकामदा ।
नमस्तस्यै महादेव्यै सर्वशक्त्यै नमोनमः ॥ ३.१३.१९॥

यदाज्ञया प्रवर्तन्ते वह्निसूर्येन्दुमारुताः ।
पृथिव्यादीनि भूतानि तस्यै देव्यै नमोनमः ॥ ३.१३.२०॥

या ससर्जादिधातारं सर्गादावादिभूरिदम् ।
दधार स्वयमेवैका तस्यै देव्यै नमोनमः ॥ ३.१३.२१॥

यथा धृता तु धरणी ययाऽऽकाशममेयया ।
यस्यामुदेति सविता तस्यै देव्यै नमोनमः ॥ ३.१३.२२॥

यत्रोदेति जगत्कृत्स्नं यत्र तिष्ठति निर्भरम् ।
यत्रान्तमेति काले तु तस्यै देव्यै नमोनमः ॥ ३.१३.२३॥

नमोनमस्ते रजसे भवायै नमोनमः सात्त्विकसंस्थितायै ।
नमोनमस्ते तमसे हरायै नमोनमो निर्गुणतः शिवायै ॥ ३.१३.२४॥

नमोनमस्ते जगदेकमात्रे नमोनमस्ते जगदेकपित्रे ।
नमोनमस्तेऽखिलरूपतन्त्रे नमोनमस्तेऽखिलयन्त्ररूपे ॥ ३.१३.२५॥

नमोनमो लोकगुरुप्रधाने नमोनमस्तेऽखिलवाग्विभूत्यै ।
नमोऽस्तु लक्ष्म्यै जगदेकतुष्ट्यै नमोनमः शांभवि सर्वशक्त्यै ॥ ३.१३.२६॥

अनादिमध्यान्तमपाञ्चभौतिकं ह्यवाङ्मनोगम्यमतर्क्यवैभवम् ।
अरूपमद्वन्द्वमदृष्टगोचरं प्रभावमग्र्यं कथमंब वर्णये ॥ ३.१३.२७॥

प्रसीद विश्वेश्वरि विश्ववन्दिते प्रसीद विद्येश्वरि वेदरूपिणि ।
प्रसीद मायामयि मन्त्राविग्रहे प्रसीद सर्वेश्वरि सर्वरूपिणि ॥ ३.१३.२८॥

इति स्तुत्वा महादेवीं देवाः सर्वे सवासवाः ।
भूयो भूयो नमस्कृत्य शरणं जग्मुरञ्जसा ॥ ३.१३.२९॥

ततः प्रसन्ना सा देवी प्रणतं वीक्ष्य वासवम् ।
वरेण च्छन्दयामास वरदाखिलदेहिनाम् ॥ ३.१३.३० ॥

इन्द्र उवाच
यदि तुष्टासि कल्याणि वरं दैत्येन्द्रपीडिताः ।
दुर्धरं जीवितं देहि त्वां गताः शरणार्थिनः ॥ ३.१३.३१ ॥

श्रीदेव्युवाच
अहमेव विनिर्जित्य भण्डं दैत्यकुलोद्भवम् ।
अचिरात्तव दास्यामि त्रैलोक्यं सचराचरम् ॥ ३.१३.३२ ॥

निर्भया मुदिताः सन्तु सर्वे देवगणास्तथा ।
ये स्तोष्यन्ति च मां भक्त्या स्तवेनानेन मानवाः ॥ ३.१३.३३ ॥

भाजनं ते भविष्यन्ति धर्मश्रीयशसां सदा ।
विद्याविनयसम्पन्ना नीरोगा दीर्घजीविनः ॥ ३.१३.३४ ॥

पुत्रमित्रकलत्राढ्या भवन्तु मदनुग्रहात् ।
इति लब्धवरा देवा देवेन्द्रोऽपि महाबलः ॥ ३.१३.३५ ॥

आमोदं परमं जग्मुस्तां विलोक्य मुहुर्मुहुः ॥ ३.१३.३६ ॥

इति श्रीब्रह्माण्डमहापुराणे उत्तरभागे हयग्रीवागस्त्यसंवादे ललितोपाख्याने
ललितास्तवराजो नाम त्रयोदशोऽध्यायः ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. lalitA stavarAjaH from brahmANDamahApurANa ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*